## ।। अथ चतुश्चत्वारिंशोऽध्याय: ।। Chapter-44

वसिष्ठ उवाच :- अत्राद्भुतमभूत्पूर्वं श्रीमाले मनुजेश्वर: ।।
शृणुष्वैकमना: सर्वं यदिते कौतुकं महत् ।। १

पुराऽभूत्पृथिवीपाल श्रीमाले मरको[1] महान् ।।
अपचारेण केनापि ब्राह्मणानां विधेर्वशात् ।। २

महारोगै: पराभूता म्रियन्ते मानवा: क्षणात् ।।
न गृहेषु प्रवर्तंते नरा: कस्यापि केचन ।। ३

रोगसंक्रमणाद्भीता मोहादिव मुमुक्षव: ।।
आक्रंदितैर्[2]मनुष्याणां शिरोघातैर्मुहुर्मुहु: ।। ४

म्रियमाणैश्च[3] रौद्रमासीन्महापुरे ।।
शोचंति पितरं केचिन्मातरं भ्रातरं तथा ।। ५

स्वसारं च नरा: केचिद्वयस्यान्सुहृद: परे[4] ।।
प्रियां प्राणेश्वरीमन्ये पुत्रमन्ये[5]तरे नृप ।। ६

अश्रुक्लिन्नकपोलानां नरवरक्षतवक्षसां ।।
दु:खादुद्धृत[6]केशानां दुर्दर्शमभवन्मुखं ।। ७

-०-

ए १ बी मरुको, बी २ आक्रान्तितैर्मनुष्याणां
४ बी यस्यास्ति सुहृद: पुरे, ५ पुत्रमन्येतरेनृप
३ ए तैर्म्रियमाणै
६ ए दुद्धृत

विप्रकीर्णाः क्वचित्केशाः श्लेष्मणः क्वचिदुच्छ्वहाः ॥
क्वचित् मृतकमाल्यानि दृश्यंते परितो बहु ॥ ८

रोदनैर्बहुघोषोऽभून्नित्यहोमशिवतानलैः ॥
शबेषु रक्तवासांसि ध्यीनं प्रेतेषु भूमिप ॥ ९

निरुच्छ्वासं निरुत्साहं निःस्वाध्यायं निरुत्सवम् ।
अभवन्मरकाक्रांतं श्रीमालमति दारुणम् ॥ १०

अथागादाश्विनो मासस्तत्र यात्रादिनं रवेः ॥
ब्राह्मणाश्च सुदुःखार्ताः शवदाहाय निर्युयुः[1] ॥ ११

त्यक्त्वा शवानि निर्वेदाच्छोचंतः शतशो द्विजाः ॥
निषेदुर्वरणीपीठे छिद्रपक्षा इवाण्डजः ॥ १२

किंभविष्यति नस्त्राता कश्चिद्देवो द्विजोऽथवा ॥
महतो मरकात् प्राणानस्मभ्यं[2] यः प्रयच्छति ॥ १३

न चंडीशो न चामुंडा न चंडी सा जगत्प्रभुः ॥
श्रीमालस्येश्वरी क्वापि नश्रीरस्तीह सांप्रतम् ॥ १४

---

१ ए नियुयुः
२ ए भ्यंयः

किकुर्म: क्व[1] च गच्छाम: कस्य वा कथयामहे ।।
अत्यर्थं नरकार्तानां को वा शरणमस्तु न: ।। १५

इति चिंतयतां तेषां कृपया परया नृप ।।
कैरातं रूपमास्थाय प्रत्यक्षोऽभूज्जगत्प्रभु: ।। १६

ददृशु: सहसा विप्रा: किरातं जरयान्वितम् ।।
नीलोत्पलदलश्यामं रक्तोत्पलविलोचनम् ।। १७

बभ्रुकेशं[2] महोच्छायं महाबाहुं महोदरम् ।।
आविकानि वसानं च पाशहस्तं स्मिताननम् ।। १८

प्रसाधनं पदो बिभ्रत् पुण्यपत्रान्विता लता ।।
अस्पृश्योऽहं किरातोऽस्मि सुदूरं स्थीयतामिति ।। १९

आहरन्नाजगामाशु यत्र ते ब्राह्मणा: स्थिता: ।।
अथ विस्मयमानेषु द्विजेषु शवसंगतान् ।। २०

आचकर्ष पटान्देवो रक्तान् रक्तस्रजा सह ।।
तद् दृष्ट्वाथ ते द्विजा : कर्म किरातस्य विगर्हितम् ।। २१

-0-

२ बी बभ्रुकेशं स-डी वक्रकेशं

१ ए क्य

क्रोधादुद्धृत्य नेत्राणि जगत्स्वामिनमब्रवीत् ।।
भो भो किरात मामेवं कुरुष्व ब्राह्मणा वयं। २२

न त्वं स्पर्शमर्हसि: प्रेतानुस्पृशसि तत्कथं।

किरात उवाच :

मयाहि करसंस्पृष्टं शुचि स्यादशुचि क्षणात् ।। २३

अपवित्रं पवित्रं स्यादित्यमाहुर्मनीषिण: ।।

ब्राह्मणा ऊचु:

को भवा[1]निह संप्राप्त: कुत्रास्ति तव केतनं। २४

मार्गश्च कस्तेव्रजत: सर्वंहि कथयस्व न: ।।

किरात उवाच

अहंगवामधीशोऽस्मि वास: सर्वेषु जंतुषु ।। २५
वायुमार्गे व्रजाम्येक: पुनर्ब्रूत यदीप्सितं।

-o-

१ ए भवानीह

ब्राह्मणाऊचुः    केन वृत्तिस्तव विभो कस्य वासि तनूद्भवः ।। २६
संततिः कीदृशी वा तत्सर्वं हि कथयस्व नः ।।
किरात उवाच :-    ऋग्यजुः सामभिर्वृत्तिजा तोऽहं ब्राह्मणः परात् ।। २७
विश्वमेतदपत्यं मे पुनर्भूत यदीप्सितं ।।
ब्राह्मणाऊचुः    पंजरेणामुना कार्यं किं ते पाशेन वा तव ।। २८
किरात इव नास्माकं प्रतीतिं कुरुषे हृदि ।।
किरातउवाच :-    पाशेनाकृष्य गृह्णामि पंजरेणात्मनः खगान् ।। २९
करोम्यहमश्रांतः कालोहं तेन वै द्विजाः ।।
वसिष्ठ उवाचः    इत्युक्तास्ते द्विजा राजन् नत्वा देवं दिवाकरं ।। ३०
तुष्टुवुः संहिताः[1] सर्वे तेजोराशिं जगत्प्रभुं ।
नमस्तेऽस्तु जगद्धातर्जगद्बीज जगद्धित ।। ३१
नमो जगत्प्रकाशाय जगत्स्वामिन्नमोऽस्तु[2] ते ।।
मत्केन पराभूतमेतद्विश्वं तमोपह ।।
परित्राहि जगन्नाथ ब्राह्मणान्ब्राह्मणप्रिय ।। ३२

-0-

१ बी सहिताः
२ बी महसा पतयेनम इत्यारभ्यं नमो ब्रह्मस्वरूपाये ति पर्यन्त बी में अधिक है विश्वव्यसनहन्त्रे च भावाभावविधायिने
नमो ब्रह्मस्वरूपाय जगत्स्वामिन् नमो स्तुते ।।

एवं स्तुतो दिवानाथः प्रत्यक्षोऽभूद्द्विजन्मनाम् ।
पाणिलीलासरोजेन स्पृष्ट्वा प्रेतानजीवयत् ।। ३३

पुष्पवृष्टिरभूद्दिव्या नेदुर्दुंदुभयो दिवि ।।
मृतकान्युदतिष्ठंत सुप्तानीव समंततः ।। ३४

उत्फुल्ललोचनाः सर्वे प्रहर्षितितनूरुहः ।।
दिनेशमर्चयांचक्रुर्जना: श्रीमालवासिनः ।। ३५

यत्र यत्र मृतो योऽभूत्तत्र तत्र नरेश्वर ।।
उदतिष्ठत्प्रहृष्टात्मा सुहृदः स्नापयन्हि सः ।। ३६

संभूय ब्राह्मणाः सर्वे प्रत्यक्षं विश्वरूपिणः ।।
पुष्पैर्धूपैश्च नैवेद्यैः पूजयित्वेदमब्रुवीत् ।। ३७

त्राहि नः परमेशान जगत्स्वामिन्नहर्पते ।।
महामरकसंभूतं महाभयमपा कुरु ।। ३८

विवस्वानुवाच एषा यात्रोत्स्वे[1] विप्राः सर्वैः श्रीमालवासिभिः ।।
वेषः कार्यः किरातस्य यथारूपो मया कृतः[2] ।। ३९

–०–

२ रूपं मया कृतम् इत्येव साधु
१ एतत्स्वे

कृतकं मृतकं कृत्वा रुदंतो मुक्तमूर्द्धजाः ।।
ये ममाग्रे लुठिष्यंति न तेषां नरकाद्भयम् । ४०

अस्पृश्याः भो वयमिति ब्रुवाणा भिल्लरूपिणः ।।
ये द्रक्ष्यंति रथारूढं न तेषां नरकाद्भयम् ।। ४१

आत्मानो नरकार्तानां सर्वेषां वै द्विजोत्तमाः ।।
आत्माधार इति ख्याता तस्मान्मूर्तिः परास्तु मे ।। ४२

अग्रे रोगान्निरस्यंतं रथारूढं रथोत्सवे ।।
आत्माधारं नमस्यंतो जना जातु न रोगिणः ।। ४३

—०—०—

जनानां नरकाग्निनात्मानां वै मया धृता: ।।
आत्माधारस्ततो लोके पूजनीयोऽस्मि सर्वदा ।। ४४

वसिष्ठ उवाच :- इति दत्वा वरान्देवी हृतानुत्थाप्य देहिन: ।।
अदृश्याऽभून्महाराज सर्वेषामपि पश्यतां ।। ४५

हृष्टस्तुष्टस्तदा लोको विज्वर: समपद्यत ।।
उत्सवा: समवर्तंत यथापूर्वं गृहे गृहे ।। ४६

प्रतिष्ठाप्य द्विजन्मान: शांतीमूर्तिमभुतां ।।
आत्माधारस्य सवितु: पूजयांचक्रिरे तदा ।। ४७

तदाप्रभृति भूपाल द्विजा: श्रीमालवासिन: ।।
श्रीमाले भिल्लवेषेण प्रवर्तंते रथोत्सवे ।। ४८

दूतकं मृतकं कृत्वा ददतो मुक्तमूर्द्धजा ।।
लुंठंति कुंडिल पुरतो भानोस्तेन ते स्युर्निरामया: ।। ४९

एतत्ते कथितं राजन् माहात्म्यं जगतां प्रभो: ।।
यथा किरातरूपेणार्के श्रीमाले भूत् पुरा हरि: ।। ५०

- -

१ बी हृष्टतुष्टस्तदा

य इदं श्रृणुयान्नित्यं पठेद्वा नियतात्मवान् ।।
आधयो व्याधयस्तस्य न जायंते कुले क्वचित् ।। ५१

—०—

इति श्री स्कंदपुराणे श्रीमालमाहात्म्ये किरातोपाख्यान नामा
चतुश्चत्वारिंशोऽध्याय: ।। ४४ ।।

१ बी माधयोनाधयस्तस्य घ ई तेषां